श्री विष्णुसहस्रनामस्तोत्रम्

CC-O. In Public Domain. Digitized by eGangotri

नामावलिश्च



Vidyabharathi Book Centre, Sirsi

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Shri Vishnu Sahasranama Stotram and Namavali

श्री विष्णुसहस्रनामस्तोत्रम्
नामावलिश्च

ಶ್ರೀ ವಿದ್ಯಾ ಭಾರತೀ
ಪುಸ್ತಕ ಕೇಂದ್ರ
ಶಾರದಾ ಜಾಡಿ, ಶೃಂಗೇರಿ-577139

T.N. KRISHNAIAH SETTY & SON
CHICKPET
BANGALORE - 560 053
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

।। विष्णुसहस्रनामस्तोत्रम् ।।

CC-O. In Public Domain. Digitized by eGangotri

ॐ नमो भगवते वासुदेवाय नमः ॐ श्री कृष्णपरमात्मने नमः

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ।। १ ।।

नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ।। २ ।।

वैशम्पायन उवाच
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ।। ३ ।।

युधिष्ठिर उवाच
किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ।। ४ ।।

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ।। ५ ।।

भीष्म उवाच
जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ।। ६ ।।

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ।। ७ ।।

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ।। ८ ।।
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ।। ९ ।।

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ।। १० ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ।। ११ ।।

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ।। १२ ।।

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ।। १३ ।।

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्त्रं मे श्रृणु पापभयापहम् ।। १४ ।।

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ।। १५ ।।

अस्य विष्णुसहस्रनामस्तोत्रस्य वेदव्यास ऋषिः ।
अनुष्टुप् छन्दः ।
श्री विश्वरूपो महाविष्णुदैवता । देवकीनन्दनः स्रष्टेति शक्तिः ।
शङ्खभृन्नन्दकी चक्रीति कीलकम् । शार्ङ्गधन्वा गदाधर इत्यस्त्रम् ।
रथाङ्गपाणिरक्षोभ्य इति नेत्रम् । त्रिसामा सामगः सामेति कवचं ।
आनन्दं ब्रह्मेति योनिः । विश्वरूप इति ध्यानं ।
ऋतं सुदर्शनः काल इति दिक्बन्धः ।
श्री महाविष्णुप्रीत्यर्थै जपे विनियोगः । ।। १६ ।।

ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ।। १७ ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १ ॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २ ॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ ३ ॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४ ॥

स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५ ॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६ ॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ ७ ॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८ ॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ॥ ९ ॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११ ॥

वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२ ॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः ॥ १३ ॥

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ १४ ॥

लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६ ॥

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७ ॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८ ॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९ ॥

महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २० ॥

CC-O. In Public Domain. Digitized by eGangotri

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१ ॥

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२ ॥

गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३ ॥

अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ॥ २४ ॥

आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५ ॥

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६ ॥

असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः ॥ २७ ॥

वृषाही वृषभो विष्णुर्वृषपर्वा वृकोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९ ॥

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः ।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित् ॥ ३३ ॥

इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५ ॥

स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७ ॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ॥ ३९ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ॥ ४० ॥

CC-0. In Public Domain. Digitized by eGangotri

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१ ॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२ ॥

रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३ ॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४ ॥

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५ ॥

विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६ ॥

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७ ॥

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥ ४८ ॥

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९ ॥

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१ ॥

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः ॥ ५४ ॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५ ॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६ ॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ॥ ५७ ॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८ ॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९ ॥

भगवान् भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६० ॥

CC-0. In Public Domain. Digitized by eGangotri
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवःस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ।। ६१ ।।

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम् ।। ६२ ।।

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ।। ६३ ।।

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ।। ६४ ।।

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ।। ६५ ।।

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः ।। ६६ ।।

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ।। ६७ ।।

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ।। ६८ ।।

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ।। ६९ ।।

कामदेवः कामपालः कामी कान्तः कृतागमः ।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनंजयः ।। ७० ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१ ॥

महाक्रमो महाकर्मा महातेजाः महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमनाः हविः ॥ ७४ ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५ ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६ ॥

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७ ॥

एको नैकःसवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८ ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ७९ ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८० ॥

CC-O. In Public Domain. Digitized by eGangotri
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥ ८१ ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३ ॥

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४ ॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥ ८५ ॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६ ॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७ ॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९ ॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्धनः ॥ ९० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ॥ ९२ ॥

सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ ९३ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४ ॥

अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥ ९६ ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहःशिशिरःशर्वरीकरः ॥ ९७ ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९ ॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १०० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १०१ ॥

आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२ ।

प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३ ॥

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १०४ ॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ १०५ ॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ १०६ ॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १०७ ॥

॥ श्री सर्वप्रहरणायुधः ॐ नमः इति ॥

फलश्रुति

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥ १ ॥

य इद शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥ २ ॥

वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ॥ ३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम् ॥ ४ ॥

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ ५ ॥

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥६ ॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ७ ॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ८ ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ ९ ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा यातिब्रह्म सनातनम् ॥ १० ॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११ ॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १२ ॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततिदं कृष्णस्य सचराचरम् ॥ १३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १४ ॥

सर्वागमनामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १५ ॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ १६ ॥

योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात् ॥ १७ ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ १८ ॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥ १९ ॥

॥ अर्जुन उवाच ॥

पद्मपत्र विशालाक्ष पद्मनाभ सुरोत्तम ।
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २० ॥

॥ श्री भगवानुवाच ॥

यो मां नामसहस्रेण स्तोतुमिच्छामि पांडव ।
सोऽहमेकेन श्लोकेन स्तुत एव न संशय ॥ २१ ॥

॥ व्यास उवाच ॥

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते ॥ २२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षि शिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि युगधारिणे नमः ॥ २३ ॥

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥ २४ ॥

यो नरः पठते नित्यं त्रिकालं केशपालये ।
द्विकालमेककालं वा क्रूरं सर्वं व्यपोहति ॥ २५ ॥

दुह्यन्ते रिपवस्तस्य सौम्याः सर्वे सदाग्रहाः ।
दिलीयंते च पापानि स्तवेह्यस्मिन् प्रकीर्तिते ॥ २६ ॥

येन ध्यातः श्रुतो येन येनेदं पठ्यते स्तवः ।
दत्तानि सर्वदानानि सुराः सर्वे समर्चिताः ॥ २७ ॥

इह लोके परे वापिं न भयं विद्यते क्वचित् ।
नाम्नां सहस्रं योऽधीते द्वादशयां मम संनिधौ ॥ २८ ॥

शनैर्दहति पापानि कल्पकोटि शातानि च ।
अश्वत्थसंनिधौ पार्थ तुलसीसंनिधौ तथा ॥ २९ ॥

पठेन्नाममहस्रं तु गवां कोटिफलं लभेत् ।
शिवालये पठेन्नित्यं तुलसीवन संस्थितः ॥ ३० ॥

नरोमुक्तिमवाप्नोति चक्रपाणेर्वचो यथा ।
ब्रह्महत्यादिकं घोरं सर्वपापं विनश्यति ॥ ३१ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

।। ॐ ।।

।। विष्णुसहस्रनामावलिः ।।

ॐ नमो भगवते वासुदेवाय ॐ श्रीकृष्णपरमात्मने नमः

ॐ अच्युताय नमः ॐ अनन्ताय नमः ॐ गोविन्दाय नमः

ॐ केशवाय नमः
ॐ नारायणाय नमः
ॐ माधवाय नमः
ॐ गोविन्दाय नमः
ॐ विष्णवे नमः
ॐ मधुसूदनाय नमः
ॐ त्रिविक्रमाय नमः
ॐ वामनाय नमः
ॐ श्रीधराय नमः
ॐ हृषीकेशाय नमः
ॐ पद्मनाभाय नमः
ॐ दामोदराय नमः

ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ विश्वस्मै नमः
ॐ विष्णवे नमः
ॐ वषट्काराय नमः
ॐ भूतभव्यभवत्प्रभवे नमः
ॐ भूतकृते नमः
ॐ भूतभृते नमः
ॐ भावाय नमः
ॐ भूतात्मने नमः
ॐ भूतभावनाय नमः
ॐ पूतात्मने नमः
ॐ परमात्मने नमः
ॐ मुक्तानां परमायै गतये नमः
ॐ अव्ययाय नमः
ॐ पुरुषाय नमः
ॐ साक्षिणे नमः
ॐ क्षेत्रज्ञाय नमः
ॐ अक्षराय नमः
ॐ योगाय नमः
ॐ योगविदां नेत्रे नमः
ॐ प्रधानपुरुषेश्वराय नमः
ॐ नारसिंहवपुषे नमः
ॐ श्रीमते नमः
ॐ केशवाय नमः
ॐ पुरुषोत्तमाय नमः
ॐ सर्वस्मै नमः ॥ २५ ॥

ॐ शर्वाय नमः
ॐ शिवाय नमः
ॐ स्थाणवे नमः
ॐ भूतादये नमः
ॐ निधये अव्ययाय नमः
ॐ संभवाय नमः
ॐ भावनाय नमः
ॐ भर्त्रे नमः
ॐ प्रभवाय नमः
ॐ प्रभवे नमः
ॐ ईश्वराय नमः
ॐ स्वयंभुवे नमः
ॐ शंभवे नमः
ॐ आदित्याय नमः
ॐ पुष्कराक्षाय नमः
ॐ महास्वनाय नमः
ॐ अनादिनिधनाय नमः
ॐ धात्रे नमः
ॐ विधात्रे नमः
ॐ धातुरुत्तमाय नमः
ॐ अप्रमेयाय नमः
ॐ हृषीकेशाय नमः
ॐ पद्मनाभाय नमः
ॐ अमरप्रभवे नमः
ॐ विश्वकर्मणे नमः ॥ ५० ॥

Sri Vidyabharathi Book Centre, Sringeri

ॐ मनवे नमः
ॐ त्वष्ट्रे नमः
ॐ स्थविष्ठाय नमः
ॐ स्थविराय ध्रुवाय नम.
ॐ अग्राह्याय नमः
ॐ शाश्वताय नमः
ॐ कृष्णाय नमः
ॐ लोहिताक्षाय नमः
ॐ प्रतर्दनाय नमः
ॐ प्रभूताय नमः
ॐ त्रिककुब्धाम्ने नमः
ॐ पवित्राय नमः
ॐ मंगलाय परस्मै नमः
ॐ ईशानाय नमः
ॐ प्राणदाय नमः
ॐ प्राणाय नमः
ॐ ज्येष्ठाय नमः
ॐ श्रेष्ठाय नमः
ॐ प्रजापतये नमः
ॐ हिरण्यगर्भाय नमः
ॐ भूगर्भाय नमः
ॐ माधवाय नमः
ॐ मधुसूदनाय नमः
ॐ ईश्वराय नमः
ॐ विक्रमिणे नमः ॥ ७५ ॥

ॐ धन्विने नमः
ॐ मेधाविने नमः
ॐ विक्रमाय नमः
ॐ क्रमाय नमः
ॐ अनुत्तमाय नमः
ॐ दुराधर्षाय नमः
ॐ कृतज्ञाय नमः
ॐ कृतये नमः
ॐ आत्मवते नमः
ॐ सुरेशाय नमः
ॐ शरणाय नमः
ॐ शर्मणे नमः
ॐ विश्वरेतसे नमः
ॐ प्रजाभवाय नमः
ॐ अह्ने नमः
ॐ संवत्सराय नमः
ॐ व्यालाय नमः
ॐ प्रत्ययाय नमः
ॐ सर्वदर्शनाय नमः
ॐ अजाय नमः
ॐ सर्वेश्वराय नमः
ॐ सिद्धाय नमः
ॐ सिद्धये नमः
ॐ सर्वादये नमः
ॐ अच्युताय नमः ॥ १०० ॥

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ वृषाकपये नमः
ॐ अमेयात्मने नमः
ॐ सर्वयोगविनिःसृताय नमः
ॐ वसवे नमः
ॐ वसुमनसे नमः
ॐ सत्याय नमः
ॐ समात्मने नमः
ॐ सम्मिताय नमः
ॐ समाय नमः
ॐ अमोघाय नमः
ॐ पुण्डरीकाक्षाय नमः
ॐ वृषकर्मणे नमः
ॐ वृषाकृतये नमः
ॐ रुद्राय नमः
ॐ बहुशिरसे नमः
ॐ बभ्रवे नमः
ॐ विश्वयोनये नमः
ॐ शुचिश्रवसे नमः
ॐ अमृताय नमः
ॐ शाश्वतस्थाणवे नमः
ॐ वरारोहाय नमः
ॐ महातपसे नमः
ॐ सर्वगाय नमः
ॐ सर्वविद्भानवे नमः
ॐ विष्वक्सनाय नमः ॥ १२५ ॥

ॐ जनार्दनाय नमः
ॐ वेदाय नमः
ॐ वेदविदे नमः
ॐ अव्यङ्गाय नमः
ॐ वेदाङ्गाय नमः
ॐ वेदविदे नमः
ॐ कवये नमः
ॐ लोकाध्यक्षाय नमः
ॐ सुराध्यक्षाय नमः
ॐ धर्माध्यक्षाय नमः
ॐ कृताकृताय नमः
ॐ चतुरात्मने नमः
ॐ चतुर्दंष्ट्राय नमः
ॐ चतुर्दंष्ट्राय नमः
ॐ चतुर्भुजाय नमः
ॐ भ्राजिष्णवे नमः
ॐ भोजनाय नमः
ॐ भोक्त्रे नमः
ॐ सहिष्णवे नमः
ॐ जगदादिजाय नमः
ॐ अनघाय नमः
ॐ विजयाय नमः
ॐ जेत्रे नमः
ॐ विश्वयोनये नमः
ॐ पुनर्वसवे नमः ॥ १५० ॥

CC-O. In Public Domain. Digitized by eGangotri

ॐ उपेन्द्राय नमः
ॐ वामनाय नमः
ॐ प्रांशवे नमः
ॐ अमोघाय नमः
ॐ शुचये नमः
ॐ ऊर्जिताय नमः
ॐ अतीन्द्राय नमः
ॐ संग्रहाय नमः
ॐ सर्गाय नमः
ॐ घृतात्मने नमः
ॐ नियमाय नमः
ॐ यमाय नमः
ॐ वेद्याय नमः
ॐ वैद्याय नमः
ॐ सदायोगिने नमः
ॐ वीरघ्ने नमः
ॐ माधवाय नमः
ॐ मधवे नमः
ॐ अतीन्द्रियाय नमः
ॐ महामायाय नमः
ॐ महोत्साहाय नमः
ॐ महाबलाय नमः
ॐ महाबुद्धये नमः
ॐ महावीर्याय नमः
ॐ महाशक्तये नमः ॥ १७५ ॥

ॐ महाद्युतये नमः
ॐ अनिर्देश्यवपुषे नमः
ॐ श्रीमते नमः
ॐ अमेयात्मने नमः
ॐ महाद्रिधृते नमः
ॐ महेष्वासाय नमः
ॐ महीभर्त्रे नमः
ॐ श्रीनिवासाय नमः
ॐ सतां गतये नमः
ॐ अनिरुद्धाय नमः
ॐ सुरानन्दाय नमः
ॐ गोविन्दाय नमः
ॐ गोविदां पतये नमः
ॐ मरीचये नमः
ॐ दमनाय नमः
ॐ हंसाय नमः
ॐ सुपर्णाय नमः
ॐ भुजगोत्तमाय नमः
ॐ हिरण्यनाभाय नमः
ॐ सुतपसे नमः
ॐ पद्नाभाय नमः
ॐ प्रजापतये नमः
ॐ अमृत्यवे नमः
ॐ सर्वदृशे नमः
ॐ सिंहाय नमः ॥ २०० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ सधात्रे नमः
ॐ संधिमते नमः
ॐ स्थिराय नमः
ॐ अजाय नमः
ॐ दुर्मर्षणाय नमः
ॐ शास्त्रे नमः
ॐ विश्रुतात्मने नमः
ॐ सुरारिघ्ने नमः
ॐ गुरवे नमः
ॐ गुरुतमाय नमः
ॐ धाम्ने नमः
ॐ सत्याय नमः
ॐ सत्यपराक्रमाय नमः
ॐ निमिषाय नमः
ॐ अनिमिषाय नमः
ॐ स्रग्विणे नमः
ॐ वाचस्पतये उदारधिये नमः
ॐ अग्रण्ये नमः
ॐ ग्रामण्ये नमः
ॐ श्रीमते नमः
ॐ न्यायाय नमः
ॐ नेत्रे नमः
ॐ समीरणाय नमः
ॐ सहस्रमूर्ध्ने नमः
ॐ विश्वात्मने नमः ॥ २२५ ॥

ॐ सहस्राक्षाय नमः
ॐ सहस्रपदे नमः
ॐ आवर्तनाय नमः
ॐ निवृत्तात्मने नमः
ॐ संवृताय नमः
ॐ संप्रमर्दनाय नमः
ॐ अहःसंवर्तकाय नमः
ॐ वह्नये नमः
ॐ अनिलाय नमः
ॐ धरणीधराय नमः
ॐ सुप्रसादाय नमः
ॐ प्रसन्नात्मने नमः
ॐ विश्वधृते नमः
ॐ विश्वभुजे नमः
ॐ विभवे नमः
ॐ सत्कर्त्रे नमः
ॐ सत्कृताय नमः
ॐ साधवे नमः
ॐ जह्नवे नमः
ॐ नारायणाय नमः
ॐ नराय नमः
ॐ असंख्येयाय नमः
ॐ अप्रमेयात्मने नमः
ॐ विशिष्टाय नमः
ॐ शिष्टकृते नमः ॥ २५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ शुचये नमः
ॐ सिद्धार्थाय नमः
ॐ सिद्धसंकल्पाय नमः
ॐ सिद्धिदाय नमः
ॐ सिद्धिसाधनाय नमः
ॐ वृषाहिणे नमः
ॐ वृषभाय नमः
ॐ विष्णवे नमः
ॐ वृषपर्वणे नमः
ॐ वृषोदराय नमः
ॐ वर्धनाय नमः
ॐ वर्धमानाय नमः
ॐ विविक्ताय नमः
ॐ श्रुतिसागराय नमः
ॐ सुभुजाय नमः
ॐ दुर्धराय नमः
ॐ वाग्मिने नमः
ॐ महेन्द्राय नमः
ॐ वसुदाय नमः
ॐ वसवे नमः
ॐ नैकरूपाय नमः
ॐ बृहद्रूपाय नमः
ॐ शिपिविष्टाय नमः
ॐ प्रकाशनाय नमः
ॐ ओजस्तेजोद्युतिधराय नमः
ॐ प्रकाशात्मने नमः
ॐ प्रतापनाय नमः
ॐ ऋद्धाय नमः
ॐ स्पष्टाक्षराय नमः
ॐ मन्त्राय नमः
ॐ चन्द्रांशवे नमः
ॐ भास्करद्युतये नमः
ॐ अमृतांशूद्भवाय नमः
ॐ मानवे नमः
ॐ शशबिन्दवे नमः
ॐ सुरेश्वराय नमः
ॐ औषधाय नमः
ॐ जगतः सेतवे नमः
ॐ सत्यधर्मपराक्रमाय नमः
ॐ भूतभव्यभवन्नाथाय नमः
ॐ पवनाय नमः
ॐ पावनाय नमः
ॐ अनलाय नमः
ॐ कामघ्ने नमः
ॐ कामकृते नमः
ॐ कान्ताय नमः
ॐ कामाय नमः
ॐ कामप्रदाय नमः
ॐ प्रभवे नमः
ॐ युगादिकृते नमः ॥ ३०० ॥

॥ ३०० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ युगादिकृते नमः
ॐ नैकमायाय नमः
ॐ महाशनाय नमः
ॐ अदृश्याय नमः
ॐ व्यक्तरूपाय नमः
ॐ सहस्रजिते नमः
ॐ अनन्तजिते नमः
ॐ इष्टाय नमः
ॐ अविशिष्टाय नमः
ॐ शिष्टेष्टाय नमः
ॐ शिखण्डिने नमः
ॐ नहुषाय नमः
ॐ वृषाय नमः
ॐ क्रोधघ्ने नमः
ॐ क्रोधकृत्कर्त्रे नमः
ॐ विश्वबाहवे नमः
ॐ महीधराय नमः
ॐ अच्युताय नमः
ॐ प्रथिताय नमः
ॐ प्राणाय नमः
ॐ प्राणदाय नमः
ॐ वासवानुजाय नमः
ॐ अपां निधये नमः
ॐ अधिष्ठानाय नमः
ॐ अप्रमत्ताय नमः ॥ ३२५ ॥

ॐ प्रतिष्ठिताय नमः
ॐ स्कन्दाय नमः
ॐ स्कन्दधराय नमः
ॐ धुर्याय नमः
ॐ वरदाय नमः
ॐ वायुवाहनाय नमः
ॐ वासुदेवाय नमः
ॐ बृहद्भानवे नमः
ॐ आदिदेवाय नमः
ॐ पुरन्दराय नमः
ॐ अशोकाय नमः
ॐ तारणाय नमः
ॐ ताराय नमः
ॐ शूराय नमः
ॐ शौरये नमः
ॐ जनेश्वराय नमः
ॐ अनुकूलाय नमः
ॐ शतावर्ताय नमः
ॐ पद्मिने नमः
ॐ पद्मनिभेक्षणाय नमः
ॐ पद्मनाभाय नमः
ॐ अरविन्दाक्षाय नमः
ॐ पद्मगर्भाय नमः
ॐ शरीरभृते नमः
ॐ महर्द्धये नमः ॥ ३५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

ॐ रुद्राय नमः
ॐ वृद्धात्मने नमः
ॐ महाक्षाय नमः
ॐ गरुडध्वजाय नमः
ॐ अतुलाय नमः
ॐ शरभाय नमः
ॐ भीमाय नमः
ॐ समयज्ञाय नमः
ॐ हविर्हरये नमः
ॐ सर्वलक्षणलक्षण्याय नमः
ॐ लक्ष्मीवते नमः
ॐ समितिंजयाय नमः
ॐ विक्षराय नमः
ॐ रोहिताय नमः
ॐ मार्गाय नमः
ॐ हेतवे नमः
ॐ दामोदराय नमः
ॐ सहाय नमः
ॐ महीधराय नमः
ॐ महाभागाय नमः
ॐ वेगवते नमः
ॐ अमिताशनाय नमः
ॐ उद्भवाय नमः
ॐ क्षोभणाय नमः
ॐ देवाय नमः ॥ ३७५ ॥

ॐ श्रीगर्भाय नमः
ॐ परमेश्वराय नमः
ॐ करणाय नमः
ॐ कारणाय नमः
ॐ कर्त्रे नमः
ॐ विकर्त्रे नमः
ॐ गहनाय नमः
ॐ गुहाय नमः
ॐ व्यवसायाय नमः
ॐ व्यवस्थानाय नमः
ॐ संस्थानाय नमः
ॐ स्थानदाय नमः
ॐ ध्रुवाय नमः
ॐ परर्द्धये नमः
ॐ परमस्पष्टाय नमः
ॐ तुष्टाय नमः
ॐ पुष्टाय नमः
ॐ शुभेक्षणाय नमः
ॐ रामाय नमः
ॐ विरामाय नमः
ॐ विरजाय नमः
ॐ मार्गाय नमः
ॐ नेयाय नमः
ॐ नयाय नमः
ॐ अनयाय नमः ॥ ४०० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ वीराय नमः
ॐ शक्तिमतां श्रेष्ठाय नमः
ॐ धर्माय नमः
ॐ धर्मविदुत्तमाय नमः
ॐ वैकुंठाय नमः
ॐ पुरुषाय नमः
ॐ प्राणाय नमः
ॐ प्राणदाय नमः
ॐ प्रणवाय नमः
ॐ पृथवे नमः
ॐ हिरण्यगर्भाय नमः
ॐ शत्रुघ्नाय नमः
ॐ व्याप्ताय नमः
ॐ वायवे नमः
ॐ अधोक्षजाय नमः
ॐ ऋतवे नमः
ॐ सुदर्शनाय नमः
ॐ कालाय नमः
ॐ परमेष्ठिने नमः
ॐ परिग्रहाय नमः
ॐ उग्राय नमः
ॐ संवत्सराय नमः
ॐ दक्षाय नमः
ॐ विश्रामाय नमः
ॐ विश्वदक्षिणाय नमः ॥ ४२५ ॥

ॐ विस्तारगत नमः
ॐ स्थावरस्थाणवे नमः
ॐ प्रमाणाय नमः
ॐ बीजाय अव्ययाय नमः
ॐ अर्थाय नमः
ॐ अनर्थाय नमः
ॐ महाकोशाय नमः
ॐ महाभोगाय नमः
ॐ महाधनाय नमः
ॐ अनिर्विण्णाय नमः
ॐ स्थविष्ठाय नमः
ॐ अभुवे नमः
ॐ धर्मयूपाय नमः
ॐ महामखाय नमः
ॐ नक्षत्रनेमये नमः
ॐ नक्षत्रिणे नमः
ॐ क्षमाय नमः
ॐ क्षामाय नमः
ॐ समीहनाय नमः
ॐ यज्ञाय नमः
ॐ इज्याय नमः
ॐ महेज्याय नमः
ॐ क्रतवे नमः
ॐ सत्राय नमः
ॐ सतां गतये नमः ॥ ४५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

ॐ सर्वदर्शिने नमः
ॐ विमुक्तात्मने नमः
ॐ सर्वज्ञाय नमः
ॐ ज्ञानमुत्तमाय नमः
ॐ सुव्रताय नमः
ॐ सुमुखाय नमः
ॐ सूक्ष्माय नमः
ॐ सुघोषाय नमः
ॐ सुखदाय नमः
ॐ सुहृदे नमः
ॐ मनोहराय नमः
ॐ जितक्रोधाय नमः
ॐ वीरबाहवे नमः
ॐ विदारणाय नमः
ॐ स्वापनाय नमः
ॐ स्ववशाय नमः
ॐ व्यापिने नमः
ॐ नैकात्मने नमः
ॐ नैककर्मकृते नमः
ॐ वत्सराय नमः
ॐ वत्सलाय नमः
ॐ वत्सिने नमः
ॐ रत्नगर्भाय नमः
ॐ धनेश्वराय नमः
ॐ धर्मगुपे नमः ॥ ४७५ ॥

ॐ धर्मकृते नमः
ॐ धर्मिणे नमः
ॐ सते नमः
ॐ असते नमः
ॐ क्षराय नमः
ॐ अक्षराय नमः
ॐ अविज्ञात्रे नमः
ॐ सहस्रांशवे नमः
ॐ विधात्रे नमः
ॐ कृतलक्षणाय नमः
ॐ गभस्तिनेमये नमः
ॐ सत्वस्थाय नमः
ॐ सिंहाय नमः
ॐ भूतमहेश्वराय नमः
ॐ आदिदेवाय नमः
ॐ महादेवाय नमः
ॐ देवेशाय नमः
ॐ देवभृद्गुरवे नमः
ॐ उत्तराय नमः
ॐ गोपतये नमः
ॐ गोप्त्रे नमः
ॐ ज्ञानगम्याय नमः
ॐ पुरातनाय नमः
ॐ शरीरभूतभृते नमः
ॐ भोक्त्रे नमः ॥ ५०० ॥

CC-O. In Public Domain. Digitized by eGangotri

ॐ वसीन्द्राय नमः
ॐ भूरिदक्षिणाय नमः
ॐ सोमपाय नमः
ॐ अमृतपाय नमः
ॐ सोमाय नमः
ॐ पुरुजिते नमः
ॐ पुरुसत्तमाय नमः
ॐ विनयाय नमः
ॐ जयाय नमः
ॐ सत्यसन्धाय नमः
ॐ दाशार्हाय नमः
ॐ सात्वतां पतये नमः
ॐ जीवाय नमः
ॐ विनयितासाक्षिणे नमः
ॐ मुकुन्दाय नमः
ॐ अमितविक्रमाय नमः
ॐ अम्भोनिधये नमः
ॐ अनन्तात्मने नमः
ॐ महोदधिशयाय नमः
ॐ अन्तकाय नमः
ॐ अजाय नमः
ॐ महार्हाय नमः
ॐ स्वाभाव्याय नमः
ॐ जितामित्राय नमः
ॐ प्रमोदनाय नमः ॥ ५२५ ॥

ॐ आनन्दाय नमः
ॐ नन्दनाय नमः
ॐ नन्दाय नमः
ॐ सत्यधर्मणे नमः
ॐ त्रिविक्रमाय नमः
ॐ महर्षये कपिलाचार्याय नमः
ॐ कृतज्ञाय नमः
ॐ मेदिनीपतये नमः
ॐ त्रिपदाय नमः
ॐ त्रिदशाध्यक्षाय नमः
ॐ महाश्रृङ्गाय नमः
ॐ कृतान्तकृते नमः
ॐ महावराहाय नमः
ॐ गोविन्दाय नमः
ॐ सुषेणाय नमः
ॐ कनकाङ्गदिने नमः
ॐ गुह्याय नमः
ॐ गभीराय नमः
ॐ गहनाय नमः
ॐ गुप्ताय नमः
ॐ चक्रगदाधराय नमः
ॐ वेधसे नमः
ॐ स्वाङ्गाय नमः
ॐ अजिताय नमः
ॐ कृष्णाय नमः ॥ ५५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ दृढाय नमः
ॐ सङ्कर्षणाय अच्युताय नमः
ॐ वरुणाय नमः
ॐ वारुणाय नमः
ॐ वृक्षाय नमः
ॐ पुष्कराक्षाय नमः
ॐ महामनसे नमः
ॐ भगवते नमः
ॐ भगघ्ने नमः
ॐ आनन्दिने नमः
ॐ वनमालिने नमः
ॐ हलायुधाय नमः
ॐ आदित्याय नमः
ॐ ज्योतिरादित्याय नमः
ॐ सहिष्णवे नमः
ॐ गतिसत्तमाय नमः
ॐ सुधन्वने नमः
ॐ खण्डपरशवे नमः
ॐ दारुणाय नमः
ॐ द्रविणप्रदाय नमः
ॐ दिवस्पृशे नमः
ॐ सर्वदृग्व्यासाय नमः
ॐ वाचस्पतये अयोनिजाय नमः
ॐ त्रिसाम्ने नमः
ॐ साम्गाय नमः ॥ ५७५ ॥

ॐ साम्ने नमः
ॐ निर्वाणाय नमः
ॐ भेषजाय नमः
ॐ भिषजे नमः
ॐ संन्यासकृते नमः
ॐ शमाय नमः
ॐ शान्ताय नमः
ॐ निष्ठायै नमः
ॐ शान्तये नमः
ॐ परायणाय नमः
ॐ शुभाङ्गाय नमः
ॐ शान्तिदाय नमः
ॐ स्रष्ट्रे नमः
ॐ कुमुदाय नमः
ॐ कुवलेशयांय नमः
ॐ गोहिताय नमः
ॐ गोपतये नमः
ॐ गोप्त्रे नमः
ॐ वृषभाक्षाय नमः
ॐ वृषप्रियाय नमः
ॐ अनिवर्तिने नमः
ॐ निवृत्तात्मने नमः
ॐ संक्षेप्त्रे नमः
ॐ क्षेमकृते नमः
ॐ शिवाय नमः॥ ६०० ।

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

ॐ श्रीवत्सवक्षसे नमः
ॐ श्रीवासाय नमः
ॐ श्रीपतये नमः
ॐ श्रीमतां वराय नमः
ॐ श्रीदाय नमः
ॐ श्रीशाय नमः
ॐ श्रीनिवासाय नमः
ॐ श्रीनिधये नमः
ॐ श्रीविभावनाय नमः
ॐ श्रीधराय नमः
ॐ श्रीकराय नमः
ॐ श्रेयसे नमः
ॐ श्रीमते नमः
ॐ लोकत्रयाश्रयाय नमः
ॐ स्वक्षाय नमः
ॐ स्वङ्गाय नमः
ॐ शतानन्दाय नमः
ॐ नन्दये नमः
ॐ ज्योतिर्गणेश्वराय नमः
ॐ विजितात्मने नमः
ॐ अविधेयात्मने नमः
ॐ सत्कीर्तये नमः
ॐ छिन्नसंशयाय नमः
ॐ उदीर्णाय नमः
ॐ सर्वतश्चक्षुषे नमः ॥ ६२५ ॥

ॐ अनीशाय नमः
ॐ शाश्वतस्थिराय नमः
ॐ भूशयाय नमः
ॐ भूषणाय नमः
ॐ भूतये नमः
ॐ विशोकाय नमः
ॐ शोकनाशनाय नमः
ॐ अर्चिष्मते नमः
ॐ अर्चिताय नमः
ॐ कुम्भाय नमः
ॐ विशुद्धात्मने नमः
ॐ विशोधनाय नमः
ॐ अनिरुद्धाय नमः
ॐ अप्रतिरथाय नमः
ॐ प्रद्युम्नाय नमः
ॐ अमितविक्रमाय नमः
ॐ कालनेमिनिघ्ने नमः
ॐ वीराय नमः
ॐ शौरये नमः
ॐ शूरजनेश्वराय नमः
ॐ त्रिलोकात्मने नमः
ॐ त्रिलोकेशाय नमः
ॐ केशवाय नमः
ॐ केशिघ्ने नमः
ॐ हरये नमः ॥ ६५० ॥

ॐ कामदेवाय नमः
ॐ कामपालाय नमः
ॐ कामिने नमः
ॐ कान्ताय नमः
ॐ कृतागमाय नमः
ॐ अनिर्देश्यवपुषे नमः
ॐ विष्णवे नमः
ॐ वीराय नमः
ॐ अनन्ताय नमः
ॐ धनंजयाय नमः
ॐ ब्रह्मण्याय नमः
ॐ ब्रह्मकृते नमः
ॐ ब्रह्मणे नमः
ॐ ब्रह्मणे नमः
ॐ ब्रह्मविवर्धनाय नमः
ॐ ब्रह्मविदे नमः
ॐ ब्राह्मणाय नमः
ॐ ब्रह्मिणे नमः
ॐ ब्रह्मज्ञाय नमः
ॐ ब्राह्मणप्रियाय नमः
ॐ महाक्रमाय नमः
ॐ महाकर्मणे नमः
ॐ महातेजसे नमः
ॐ महोरगाय नमः
ॐ महाक्रतवे नमः ॥ ६७५ ॥

ॐ महायज्वने नमः
ॐ महायज्ञाय नमः
ॐ महाहर्विषे नमः
ॐ स्तव्याय नमः
ॐ स्तवप्रियाय नमः
ॐ स्तोत्राय नमः
ॐ स्तुतये नमः
ॐ स्तोत्रे नमः
ॐ रणप्रियाय नमः
ॐ पूर्णाय नमः
ॐ पूरयित्रे नमः
ॐ पुण्याय नमः
ॐ पुण्यकीर्तये नमः
ॐ अनामयाय नमः
ॐ मनोजवाय नमः
ॐ तीर्थकराय नमः
ॐ वसुरेतसे नमः
ॐ वसुप्रदाय नमः
ॐ वसुप्रदाय नमः
ॐ वासुदेवाय नमः
ॐ वसवे नमः
ॐ वसुमनसे नमः
ॐ हविषे नमः
ॐ सद्गतये नमः
ॐ सत्कृतये नमः ॥ ७०० ॥

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

ॐ सत्यायै नमः
ॐ सद्भूतये नमः
ॐ सत्परायणाय नमः
ॐ शूरसेनाय नमः
ॐ यदुश्रेष्ठाय नमः
ॐ सन्निवासाय नमः
ॐ सुयामुनाय नमः
ॐ भूतावासाय नमः
ॐ वासुदेवाय नमः
ॐ सर्वासुनिलयाय नमः
ॐ अनलाय नमः
ॐ दर्पघ्ने नमः
ॐ दर्पदाय नमः
ॐ दृप्ताय नमः
ॐ दुर्धराय नमः
ॐ अपराजिताय नमः
ॐ विश्वमूर्तये नमः
ॐ महामूर्तये नमः
ॐ दीप्तमूर्तये नमः
ॐ अमूर्तिमते नमः
ॐ अनेकमूर्तये नमः
ॐ अव्यक्ताय नमः
ॐ शतमूर्तये नमः
ॐ शताननाय नमः
ॐ एकाय नमः ॥ ७२५ ॥

ॐ नैकाय नमः
ॐ सवाय नमः
ॐ काय नमः
ॐ कस्मै नमः
ॐ यस्मै नमः
ॐ तस्मै नमः
ॐ पदायानुत्तमाय नमः
ॐ लोकबन्धवे नमः
ॐ लोकनाथाय नमः
ॐ माधवाय नमः
ॐ भक्तवत्सलाय नमः
ॐ सुवर्णवर्णाय नमः
ॐ हेमाङ्गाय नमः
ॐ वराङ्गाय नमः
ॐ चन्दनाङ्गदिने नमः
ॐ वीरघ्ने नमः
ॐ विषमाय नमः
ॐ शून्याय नमः
ॐ घृताशिषे नमः
ॐ अचलाय नमः
ॐ चलाय नमः
ॐ अमानिने नमः
ॐ मानदाय नमः
ॐ मान्याय नमः
ॐ लोकस्वामिने नमः ॥ ७५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ त्रिलोकधृते नमः
ॐ सुमेधसे नमः
ॐ मेधजाय नमः
ॐ धन्याय नमः
ॐ सत्यमेधसे नमः
ॐ धराधराय नमः
ॐ तेजोवृषाय नमः
ॐ द्युतिधराय नमः
ॐ सर्वशस्त्रभृतां वराय नमः
ॐ प्रग्रहाय नमः
ॐ निग्रहाय नमः
ॐ व्यग्राय नमः
ॐ नैकशृङ्गाय नमः
ॐ गदाग्रजाय नमः
ॐ चतुर्मूर्तये नमः
ॐ चतुर्बाहवे नमः
ॐ चतुर्व्यूहाय नमः
ॐ चतुर्गतये नमः
ॐ चतुरात्मने नमः
ॐ चतुर्भावाय नमः
ॐ चतुर्वेदविदे नमः
ॐ एकपदे नमः
ॐ समावर्ताय नमः
ॐ अनिवृत्तात्मने नमः
ॐ दुर्जयाय नमः ॥ ७७५ ॥

ॐ दुरतिक्रमाय नमः
ॐ दुर्लभाय नमः
ॐ दुर्गमाय नमः
ॐ दुर्गाय नमः
ॐ दुरावासाय नमः
ॐ दुरारिघ्ने नमः
ॐ शुभाङ्गाय नमः
ॐ लोकसारङ्गाय नमः
ॐ सुतन्तवे नमः
ॐ तन्तुवर्धनाय नमः
ॐ इन्द्रकर्मणे नमः
ॐ महाकर्मणे नमः
ॐ कृतकर्मणे नमः
ॐ कृतागमाय नमः
ॐ उद्भवाय नमः
ॐ सुन्दराय नमः
ॐ सुन्दाय नमः
ॐ रत्ननाभाय नमः
ॐ सुलोचनाय नमः
ॐ अर्काय नमः
ॐ वाजसनाय नमः
ॐ श्रृङ्गिणे नमः
ॐ जयन्ताय नमः
ॐ सर्वविज्जयिने नमः
ॐ सुवर्णबिन्दवे नमः ॥ ८०० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ॐ अशोकाय नमः
ॐ सर्ववागीश्वरेश्वराय नमः
ॐ महाह्रदाय नमः
ॐ महागर्ताय नमः
ॐ महाभूताय नमः
ॐ महानिधये नमः
ॐ कुमुदाय नमः
ॐ कुन्दराय नमः
ॐ कुन्दाय नमः
ॐ पर्जन्याय नमः
ॐ पावनाय नमः
ॐ अनिलाय नमः
ॐ अमृतांशाय नमः
ॐ अमृतवपुषे नमः
ॐ सर्वज्ञाय नमः
ॐ सर्वतोमुखाय नमः
ॐ सुलभाय नमः
ॐ सुव्रताय नमः
ॐ सिद्धाय नमः
ॐ शत्रुजिते नमः
ॐ शत्रुतापनाय नमः
ॐ न्यग्रोधाय नमः
ॐ उदुम्बराय नमः
ॐ अश्वत्थाय नमः
ॐ चाणूरान्ध्रनिषूदनाय नमः
ॐ सहस्रार्चिषे नमः
ॐ सप्तजिह्वाय नमः
ॐ सप्तै धसे नमः
ॐ सप्तवाहनाय नमः
ॐ अमूर्तये नमः
ॐ अनघाय नमः
ॐ अचिन्त्याय नमः
ॐ भयकृते नमः
ॐ भयनाशनाय नमः
ॐ अणवे नमः
ॐ बृहते नमः
ॐ कृशाय नमः
ॐ स्थूलाय नमः
ॐ गुणभृते नमः
ॐ निर्गुणाय नमः
ॐ महते नमः
ॐ अधृताय नमः
ॐ स्वधृताय नमः
ॐ स्वास्याय नमः
ॐ प्राग्वंशाय नमः
ॐ वंशवर्धनाय नमः
ॐ भारभृते नमः
ॐ कथिताय नमः
ॐ योगिने नमः
ॐ योगीशाय नमः ॥ ८५० ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ सर्वकामदाय नमः
ॐ आश्रमाय नमः
ॐ श्रमणाय नमः
ॐ क्षामाय नमः
ॐ सुपर्णाय नमः
ॐ वायुवाहनाय नमः
ॐ धनुर्धराय नमः
ॐ धनुर्वेदाय नमः
ॐ दण्डाय नमः
ॐ दमयित्रे नमः
ॐ दमाय नमः
ॐ अपराजिताय नमः
ॐ सर्वसहाय नमः
ॐ अनियन्त्रे नमः
ॐ अनियमाय नमः
ॐ अयमाय नमः
ॐ सत्ववते नमः
ॐ सात्विकाय नमः
ॐ सत्याय नमः
ॐ सत्यधर्मपरायणाय नमः
ॐ अभिप्रायाय नमः
ॐ प्रियार्हाय नमः
ॐ अर्हाय नमः
ॐ प्रियकृते नमः
ॐ प्रीतिवर्धनाय नमः ॥ ८७५ ॥

ॐ विहायसगतये नमः
ॐ ज्योतिषे नमः
ॐ सुरुचये नमः
ॐ हुतभुजे नमः
ॐ विभवे नमः
ॐ रवय नमः
ॐ विरोचनाय नमः
ॐ सूर्याय नमः
ॐ सवित्रे नमः
ॐ रविलोचनाय नमः
ॐ अनन्ताय नमः
ॐ हुतभुजे नमः
ॐ भोक्त्रे नमः
ॐ सुखदाय नमः
ॐ नैकजाय नमः
ॐ अग्रजाय नमः
ॐ अनिर्विण्णाय नमः
ॐ सदामर्षिणे नमः
ॐ लोकाधिष्ठानाय नमः
ॐ अद्भुताय नमः
ॐ सनाते नमः
ॐ सनातनतमाय नमः
ॐ कपिलाय नमः
ॐ कपये नमः
ॐ अप्ययाय नमः ॥ ९०० ॥

CC-O. In Public Domain. Digitized by eGangotri

ॐ स्वस्तिदाय नमः
ॐ स्वस्तिकृते नमः
ॐ स्वस्तिने नमः
ॐ स्वस्तिभुजे नमः
ॐ स्वस्तिदक्षिणाय नमः
ॐ अरौद्राय नमः
ॐ कुण्डलिने नमः
ॐ चक्रिणे नमः
ॐ विक्रमिणे नमः
ॐ ऊर्जितशासनाय नमः
ॐ शब्दातिगाय नमः
ॐ शब्दसहाय नमः
ॐ शिशिराय नमः
ॐ शर्वरीकराय नमः
ॐ अक्रूराय नमः
ॐ पेशलाय नमः
ॐ दक्षाय नमः
ॐ दक्षिणाय नमः
ॐ क्षमिणां वराय नमः
ॐ विद्वत्तमाय नमः
ॐ वीतभयाय नमः
ॐ पुण्यश्रवणकीर्तनाय नमः
ॐ उत्तारणाय नमः
ॐ दुष्कृतिघ्ने नमः
ॐ पुण्याय नमः ॥ ९२५ ॥

ॐ दुःस्वप्ननाशनाय नमः
ॐ वीरघ्ने नमः
ॐ रक्षणाय नमः
ॐ सन्ताय नमः
ॐ जीवनाय नमः
ॐ पर्यवस्थिताय नमः
ॐ अनन्तरूपाय नमः
ॐ अनन्तश्रिये नमः
ॐ जितमन्यवे नमः
ॐ भयापहाय नमः
ॐ चतुरस्राय नमः
ॐ गभीरात्मने नमः
ॐ विदिशाय नमः
ॐ व्यादिशाय नमः
ॐ दिशाय नमः
ॐ अनादये नमः
ॐ भूर्भुवाय नमः
ॐ लक्ष्म्यै नमः
ॐ सुवीराय नमः
ॐ रुचिराङ्गदाय नमः
ॐ जननाय नमः
ॐ जनजन्मादये नमः
ॐ भीमाय नमः
ॐ भीमपराक्रमाय नमः
ॐ आधारनिलयाय नमः ॥ ९५० ॥

CC-O. In Public Domain. Digitized by eGangotri

ॐ अधात्रे नमः
ॐ पुष्पहासाय नमः
ॐ प्रतागराय नमः
ॐ ऊर्ध्वगाय नमः
ॐ सत्पथाचाराय नमः
ॐ प्राणदाय नमः
ॐ प्रणवाय नमः
ॐ पणाय नमः
ॐ प्रमाणाय नमः
ॐ प्राणनिलयाय नमः
ॐ प्राणभृते नमः
ॐ प्राणजीवनाय नमः
ॐ तत्वाय नमः
ॐ तत्वविदे नमः
ॐ एकात्मने नमः
ॐ जन्ममृत्युजरातिगाय नमः
ॐ भूर्भुवःस्वस्तरवे नमः
ॐ ताराय नमः
ॐ सवित्रे नमः
ॐ प्रपितामहाय नमः
ॐ यज्ञाय नमः
ॐ यज्ञपतये नमः
ॐ यज्वने नमः
ॐ यज्ञाङ्गाय नमः
ॐ यज्ञवाहनाय नमः ॥ ९७५ ॥

ॐ यज्ञभृते नमः
ॐ यज्ञकृते नमः
ॐ यज्ञिने नमः
ॐ यज्ञभुजे नमः
ॐ यज्ञसाधनाय नमः
ॐ यज्ञान्तकृते नमः
ॐ यज्ञगुह्याय नमः
ॐ अन्नाय नमः
ॐ अन्नादाय नमः
ॐ आत्मायोनये नमः
ॐ स्वयंजाताय नमः
ॐ वैखानाय नमः
ॐ सामगायनाय नमः
ॐ देवकीनन्दनाय नमः
ॐ स्रष्ट्रे नमः
ॐ क्षितीशाय नमः
ॐ पापनाशनाय नमः
ॐ शङ्खभृते नमः
ॐ नन्दकिने नमः
ॐ चक्रिणे नमः
ॐ शार्ङ्गधन्वने नमः
ॐ गदाधराय नमः
ॐ रथाङ्गपाणये नमः
ॐ अक्षोभ्याय नमः
ॐ सर्वप्रहरणायुधाय नमः ॥ १००० ॥

ॐ सर्वप्रहरायुधाय नमः

इति श्रीविष्णुसहस्रनामावली समाप्ता ॥

Sri Vidyabhaskara Guru Seva Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Shri Vishnu Sahasranama

T.N.K. & Son
Rs. 12-00

T.N. KRISHNAIAH SETTY & SON
CHICKPET
BANGALORE - 560 053

Sri Vidyabharathi Book Centre, Sringeri

Printed by SREE VENKATESWARA PRINTING PRESS,
Chickepet, Bangalore - 560 053.